International Journal of Applied Research 2017; 3(6): 733-736



International Journal of Applied Research

**ISSN Print:** 2394-7500
**ISSN Online:** 2394-5869
**Impact Factor:** 5.2
IJAR 2017; 3(6): 733-736
www.allresearchjournal.com
Received: 09-04-2017
Accepted: 10-05-2017

**Pragya**
Research Student, Department of Sahitya, Rastriya Sanskrit Sansthan, Ved Vyas Campus, Balahar, Kangra, HP, India

**Correspondence**
**Pragya**
Research Student, Department of Sahitya, Rastriya Sanskrit Sansthan, Ved Vyas Campus, Balahar, Kangra, HP, India

# उदाहरणकाव्यमाध्यमेन कतिपयपाणिनीयसूत्रोदाहरणानामर्थप्रयोगयोर्विमर्शः

**Pragya**

## प्रस्तावना

इयं खलु संस्कृतवाङ्मये पुरातनी परम्परा यत् काव्यशास्त्रविनोदेन शास्त्रीयपदार्थानां तदीयगूढरहस्यनाञ्चावबोधनम् अतीवसरलतया रीत्या क्रियते। तदीयामेव लोकोपकारिणीं परम्परामाश्रित्य केचन करुणापरायणाः कविमूर्धन्याः काव्यमाध्यमेन नीरसं व्याकरणशिक्षणं सरलं सरसञ्चापादयितुं कानिचिद् व्याकरणप्रमुखानि काव्यानि विनिर्मितवन्तः। यत्र काव्यगुणानां प्राचुर्यं व्याकरणशास्त्रीयनियमानां प्रयोगाणाञ्च प्रदर्शनमस्ति। तथा च क्षेमेन्द्रः सुवृत्ततिलके प्राह-

शास्त्रं काव्यं शास्त्रकाव्यं काव्यशास्त्रञ्च भेदतः ।
चतुष्प्रकारः प्रसरः सतां सारस्वतो मतः ।।
शास्त्रं काव्यविदः प्राहुः सर्वकाव्याङ्गलक्षणम् ।
काव्यं विशिष्टशब्दार्थसाहित्यसदलङ्कृतिः।।
शास्त्रकाव्यं चतुर्वर्गप्रायं सर्वोपदेशकृत् ।
भट्टि-भौमककाव्यादि 'काव्यशास्त्र' प्रचक्षते ।।[१]

अत्र काव्यशास्त्रशब्दः भट्टिकाव्यादिसदृशेभ्यः प्रयुक्तः परं कालान्तरे काव्यशास्त्रशब्दः साहित्यशास्त्रीयलक्षणग्रन्थेभ्यः बहुलतया व्यवहृतोऽभूत्। अतः सन्देहनिवृत्तये स्पष्टार्थञ्च प्रायशः विद्वांसः भट्टिकाव्यादिसदृशेभ्यः काव्येभ्यः 'उदाहरणकाव्यम्' इति शब्दं प्रयोजितवन्तः। व्याकरणोदाहरणप्रदर्शनपरककाव्येभ्यः अस्य नाम्नः सर्वप्रथमोल्लेखः चतुर्दशशताब्द्यां अमृतानन्दयोगी इत्यस्य अलङ्कारसंग्रहः इत्यस्मिन् ग्रन्थे प्राप्यते-

उदाहरणकाव्यत्वान्न दुष्टं श्रुतिकट्वपि।[२]

चतुर्दशशताब्द्याः महान् टीकाकारः मल्लिनाथोऽपि मतमेतत् समर्थयति। भट्टिकाव्यस्य टीकाया आरम्भे वचनमिदं तस्य-

रामकथामाश्रित्य पाणिनीयसूत्राणामुदाहरणकाव्यं चिकीर्षुः[३]

सप्तमशताब्द्यां केरलवास्तव्यः श्रीमद्नारायणभट्टकविप्रणीतं 'धातुकाव्य'माश्रित्य तस्य शिष्यैः सम्पादितकृष्णार्पणटीकायामपि ईदृग्विधानां काव्यानां कृतेऽयं शब्दः प्रयुक्तः-

अन्योदाहरणकाव्येषु क्वचिदप्यदृष्टमिदमिहातिशयं प्रतिपादयति[४]

सरसरीत्या व्याकरणप्रक्रियाशिक्षयितुं व्याकृतपदप्रयोगाणामभ्यासार्थं प्राचीनकालादेव उदाहरणकाव्यानामियं परम्परा प्रचलितास्ति। अस्यामेव परम्परायां मुख्यरूपेण विराजते- श्रीमद्भट्टिकविप्रणीतं रावणवधमपरं नाम 'भट्टिकाव्यम्', काश्मीरवास्तव्यः महाकविः भट्टभूमरचितं 'अर्जुनरावणीयम् रावणार्जुनीयम्' वा, महाकविहलायुधप्रणीतं विशिष्टधातुप्रयोगसमन्वितं 'कविरहस्यम्', आचार्यहेमचन्द्रसूरिणा विरचितं व्याकरणोदाहरणसमापनीयं 'द्व्याश्रयमहाकाव्यम्', केरलवास्तव्येन वासुदेवककविना प्रणीतं 'वासुदेवविजयम्' नाम काव्यम्, नारायणकविना विरचितं 'सुभद्राहरणम्' महाकाव्यमित्यादीनि व्याकरणोदाहरणकाव्यानि सुविख्यातानि सन्ति।

उदाहरणकाव्यमाध्यमेन व्याकरणसम्बन्धीसूत्रोदाहरणानामर्थः प्रयोगज्ञानञ्च सुस्पष्टतया विशदीभवति। प्रक्रियानुसारेणशब्दनिष्पत्तौ सत्यामपि यावत् उदाहरणानामर्थाः नावबुध्यन्ते तेषां प्रयोगश्च नावगम्यते, तावदपूर्णमिदं व्याकरणाध्ययनं तत्फलमपि च न कदाचिदवाप्यते। प्रयोगज्ञानेनैव व्याकरणाध्ययनं फलवान् भवति। एवमध्ययनाध्यापनक्षेत्रे सूत्रोदाहरणानामर्थज्ञानं प्रयोगप्रदर्शनञ्चापरिहेयतत्वरूपेण अङ्गभूतमस्ति। उदाहरणानां वाक्यगतप्रयोगप्रदर्शनाय पूर्वनिर्दिष्टानि प्राचीनानि उदाहरणकाव्यानि सुगृहीतानि। इतोऽतिरिक्तानां रामायण- महाभारत- रघुवंश- किरातार्जुनीय- शिशुपालवध- नैषधीयचरित- चम्पूभारत-अनर्घराघवादीनामुदाहरणानामुल्लेखो यथावसरे प्रदीयते। शोधप्रपत्रेऽस्मिन् केषाञ्चिद्

विशिष्टोदाहरणानामर्थप्रयोगयोर्विमर्शो विधीयते। यथा- 'युवोरनाकौ'[५]- अङ्गसम्बन्धिनो: यु वु इत्येतयो: स्थाने यथासंख्यम् अन अक इत्येतावादेशौ भवत:। उदाहरणानि- अन- नन्दयतीति नन्दन:। रमण:- रमयतीति रमण:। सायन्तन:, चिरन्तन:। अक- कारक:- करोतीति एवं हरतीति हारक:। अर्जुनक:- अर्जुने भक्तिरस्येति अर्जुनक:, एवं वासुदेवकोऽपि। अथ प्रयोगा: —
नन्दनस्तव य: प्रेयान् त्वत्प्रभावभृतोदय:।
जनेनार्जुनकेनासौ सार्जुनेन पराजित:।।[६]

**भट्टिकाव्ये-**

इत्थंप्रवादं युधि सम्प्रहारं प्रचक्रतू रामनिशाविहारौ।
तृणाय मत्वा रघुनन्दनोऽथ बाणेन रक्ष: प्रधनान्निरास्थत्।।[७]
रघुवंशस्य नन्दयिता रघुनन्दन:।
सख्यस्य तव सुग्रीव: कारक: कपिनन्दन:।
द्रुतं द्रष्टासि मैथिल्या: सैवमुक्त्वा तिरोऽभवत्।।[८]
कारक:- कर्त्ता । कपिनन्दन:- वानरनन्दयिता।

**सुभद्राहरणे-**

अथ जातु कौशिकमुनेस्तपोवनं मुनिमण्डलानुचरचक्रसंवृत:।
विरलीभवत्तपनभासि वासरे सुमना विवेश शतमन्युनन्दन:।।[९]

**द्व्याश्रयमहाकाव्ये-**

भीष्मवायुबलोपृच्छदाशातन्तुप्रवर्धनीम्।
देवीं दोहदकार्याणि नन्दनोत्क: स नन्दक:।।[१०]
नन्दयतीति नन्दनम् उद्यानम्, तत्र उत्क: स नन्दक: आह्लादकोऽभूत्।

**वासुदेवविजये-**

कृतार्थता यस्य पदाम्बुजं सदा निषेवमाणं वृणुतेऽचिरात्स्वयम्।
हृदा दधत्तं वसुदेवनन्दनं पुने गिरस्तच्चरितामृतोर्मिभि:।।[११]
तरवोऽपि च शारदास्तदानीं सह वासन्तिकभूरुहै: प्रसूनै:।
अपरैरपि हैमनादिभिस्तं समसेवन्त चिरन्तनं पुमांसम्।।[१२]

**शिशुपालवधे-**

न यावदेतावुदपश्यदुत्थितौ जनस्तुषाराञ्जनपर्वताविव।
स्वहस्तदत्ते मुनिमासने मुनिश्चिरन्तनस्तावदभिन्यवीविशत्।।[१३]
चिरन्तन: पुराण: ।

**रघुवंशे -**

तामङ्कमारोप्य कृशाङ्गयष्टिं वर्णान्तराक्रान्तपयोधराग्राम्।
विलज्जमानां रहसि प्रतीत: पप्रच्छ रामां रमणोऽभिलाषम्।।[१४]

**अभिज्ञानशाकुन्तले-**

सायन्तनेसवनकर्मणि संप्रवृत्ते
वेदिं हुताशनवतीं परित: प्रयस्ता:।
छायाश्चरन्ति बहुधा भयमादधाना:
सन्ध्यापयोदकपिशा: पिशिताशनानाम्।।[१५]

**मेघदूते -**

गच्छन्तीनां रमणवसतिं योषितां तत्र नक्तं
रुद्धालोके नरपतिपथे सूचिभेद्यैस्तमोभि:।[१६]

**मैत्रायणीसंहितायाम् -**

उभयमेवास्मै भागधेयं प्रयच्छति सायन्तनं च प्रातस्तनं च।[१७]

'स्वागतादीनां च'[१८] इत्यनेन सूत्रेण स्वागत इत्येवमादीनां यदुक्तं तद् न भवति। स्वागतमित्याह स्वागतिक:। स्वध्वरेण चरति स्वाध्वरिक:। स्वङ्गस्यापत्यं स्वाङ्गि:। व्यङ्गस्यापत्यं व्याङ्गि:। व्यडस्यापत्यं व्याडि:। व्यवहारेण चरति व्यावहारिक:। व्यवहारशब्दोऽयं लौकिके वृत्ते वर्तते न तु कर्मव्यतिहारे। स्वपतौ साधु: स्वापतेय:। 'द्रव्यं वित्तं स्वापतेयं रिक्थमृक्थं धनं वसु' इत्यमर:।[१९] न्यासे स्पष्टीकृतमेतत् - शोभनमागतं स्वागतम्। ..शोभनोऽध्वर: स्वध्वर: ।.. शोभनान्यङ्गान्यस्य स्वङ्ग:, विगतान्यङ्गान्यस्य व्यङ्ग:, व्यवहरणं व्यवहार:[२०]। पृच्छतौ सुस्नातादिभ्य:- सुस्नातं पृच्छति सौस्नातिका। सौखशायनिक:।
डा० वासुदेवशरण अग्रवालवर्य: विषयेऽस्मिन् लिखति यत् -''राजसभा में राजा के पधारने पर जो स्वागत करे वह स्वागतिक कहलाता था। ...कात्यायन ने इनका और उल्लेख किया है -सौखशायनिक - जो प्रात: काल राजा के निद्रा त्याग करने पर उसके रात में सुखपूर्वक शयन करने के विषय में प्रश्न करता था (सुखशयनं पृच्छति )। लोहकुम्भी जातक में कथा है कि कोसल के राजा के यहाँ प्रात: काल सुखशयन पूछने के लिये ब्राह्मण आया करते थे (अरुणागमनवेलया ब्राह्मणा आगन्त्वा राजानं सुखसयितं पृच्छिसु, जा०-३.४३)''[२१]।

**अर्जुनरावणीये-**

तेऽभवन्नस्य स्वागतिका: शौवापदत्रासवर्जिता:।
पूर्ववार्षिकं वने येषां कुम्भ्यां धान्यं द्विजन्मनाम्।।[२२]
स्वागतमित्याह य: स स्वागतिक:।
संयत्कथैकपाथेय-स्वापतेयपुरस्सरम्।
गृहवद्युधि कुर्वाणमातिथेयमुपेयुषाम्।।[२३]

**वासुदेवविजये-**

पदकक्रमकं पान्तं देवं स्वागतिकास्तदा।
शौवापदभयापेते देशेऽस्तुवत निर्जरा:।।[२४]
स्वागतिका:- स्वागतं ब्रुवाणा:।

**रघुवंशे-**

विन्ध्यस्य संस्तम्भयिता महाद्रेर्नि:शेषपीतोज्झितसिन्धुराज:।
प्रीत्याश्वमेधावभृथार्द्रमूर्ते: सौस्नातिको यस्य भवत्यगस्त्य:।।[२५]
सुस्नातं पृच्छतीति सौस्नातिक:।
योगनिद्रान्तविशदै: पावनैरवलोकनै:।
भृग्वादीननुगृह्णन्त सौखशायनिकानृषीन्।।[२६]
सुखशयनं पृच्छतीति सौखशायनिकास्तान्।

**चम्पूरामायणे-**

दिङ्मूलशैलकुहरेशयकेसरीन्द्र सौखप्रसुप्तिकमहापटहाखेग।
कर्णौ बलेन करनर्तितकालपृष्ठो जन्यस्थलीमथ रथेन जवाज्जगाहे।।[२७]
सुखप्रसुप्तं पृच्छतीति सौखप्रसुप्तिक:।
अनर्घराघवे-
दिङ्मण्डलीमुकुटमण्डनपद्मरागरत्नाङ्कुरे किरणमालिनि गर्भितेऽपि।
सौखप्रसुप्तिकमधुव्रतचक्रवालवाचालपङ्कजवनीसरसा: सरस्य:।।[२८]

**द्व्याश्रयमहाकाव्ये –**

नैयङ्कव्यसीन्नयाङ्कवत्वक्पटानां
त्वग्दु:प्रापास्मिन्घोषयत्याश्वमारिम्।

**स्वाङ्गिव्याङ्गिश्वाभस्त्रिभिर्व्याविभाषी-**

निष्ठैः श्वाकर्णेप्युच्चकैः पल्लिदेशे।।[२९]

स्वाङ्गिव्याङ्गिश्वाभस्त्रिभिः स्वङ्गव्यङ्गश्वभस्त्राणामपत्यैः।

**माघे-**

स्वापतेयमधिगम्य धर्मतः पर्यपालयमवीवृधं च यत्।

तीर्थगामि करवै विधानतस्तज्जुषस्व जुहवानि चानले ।।[३०]

यत्स्वपतौ स्वामिनि साधु तत् स्वापतेयं वित्तम्।

'पूर्वपदात्संज्ञायामगः'[३१] इत्यनेन सूत्रेण पूर्वपदस्थाद् निमित्तादुत्तरस्य गकारवर्जिताद् नकारस्य णकारादेशो भवति सञ्ज्ञायां विषये। द्रुणसः-'द्रुरिव नासिकास्येति बहुव्रीहिः। द्रुशब्दोऽत्रशाखावचनः'[३२]। खरणसः- खरः गर्दभः इव नासिका यस्य सः। सूर्पणखा - शूर्प इव नखाः यस्या सा। वार्ध्रीणसः- वध्रर्म विकारो वार्ध्री रज्जुः, वाध्रीव नासिका यस्य सः वार्ध्रीणसः मृगविशेषः। प्रक्रियासर्वस्वकारः 'द्रुहण्यतेऽनेनेति द्रुघणः कुठारभेदः' इत्यन्योऽपि योजयति।[३३]

**वाल्मीकिरामायणे-**

ततः शूर्पणखा वाक्यं सवाष्पमिदमब्रवीत्।[३४]

**काठकसंहितायाम् —**

गृध्रश्शितिकक्षी वार्ध्रीणसस्तेऽदित्याः।[३५]

**रघुवंशे-**

राघवास्त्रविदीर्णानां रावणं प्रति रक्षसाम्,

तेषां शूर्पणखेवैका दुष्प्रवृत्तिहराभवत्।।[३६]

शूर्पवत् नखा यस्या सा शूर्पणखा।

अथ प्राचेतसोपज्ञं रामायणमितस्ततः।

मैथिलेयौ कुशलवौ जगदुर्गुरुचोदितौ।।[३७]

रामस्यायनं रामायणम् ।

**भट्टिकाव्ये-**

द्रुघणोद्भिन्नकल्पाग्रास्तरसा तरुसंहतीः।

अव्याध्यपृच्छन् कुर्वाणास्तां तेऽयोघनमुष्टयः।।[३८]

दुर्द्रुमो हन्यतेऽनेनेति द्रुघणः।

बहुधा भिन्नमर्माणो भीमाः खरणसादयः।

अग्रेवणं वर्तमाने प्रतीच्यां चन्द्रमण्डले।।[३९]

खरणसादयः खरस्येव नासिका येषां ते ।

**माघे-**

रथमास्थितस्य च पुराभिवर्तिनस्तिसृणां पुरामिव रिपोर्मुरद्विषः।

अथ धर्ममूर्तिरनुरागभावितः स्वयमादित प्रवयणं प्रजापतिः।।[४०]

प्रवीयते प्रेर्यतेऽनेनेति प्रवयणम्।

**अर्जुनरावणीये-**

वध्वा प्रयुक्ता गुरुसन्निधाने सलज्जया मङ्लपात्रहस्ता।

दशाननं शूर्पणखेव काचित् सहोदरा भूपतिमाससाद।।[४१]

**द्व्याश्रयमहाकाव्ये-**

ऋगयनपठनेन दुर्णसैस्तैः प्रवणान्तर्वणनिर्वणोषितैः किम्।

चलितोऽसि मृषा द्विजैर्ब्रुवाणैराम्रवणेक्षुवणानि नः खनद्भिः।।[४२]

दुर्णसैः-विकृतनासिकैः।

**वासुदेवविजये-**

कौसल्यायन्यभूः प्राक् प्रतिककुभमिषूर्वर्षुकोऽग्रेवणं द्राक्

प्रामीणास्तं त्रिमूर्धं खरणसमवटीटं च रक्षः खरादि।

शौर्येणाधो विधाता शरवणजनुषं वैरवाहेण पत्या

यातूनां व्यग्रहीष्ठाः सरणगिरिणदीवारिपाणाग्र्यवृत्तिः।।[४३]

खरस्येव नासिका यस्य तं खरणसम्).

**संदर्भ ग्रथ सूची**


१. सुवृत्ततिलके- ३/२-४
२. अलङ्कारसंग्रहः-६.८२
३. भट्टिकाव्यम् १.१ मल्लिनाथकृतसर्वपथीनव्याख्योपेतम्
४. धातुकाव्यम्- कृष्णार्पणटीका- १.१
५. अष्टाध्यायी - ७.१.१
६. अर्जुनरावणीय -२१.२
७. भट्टिकाव्यम् -२.३६
८. भट्टिकाव्यम्-६.७२
९. सुभद्राहरण-४.१०६
१०. द्व्याश्रयमहाकाव्य -११.४
११. वासुदेवविजय -१.१
१२. वासुदेवविजय -४.१८
१३. शिशुपालवध -१.१५
१४. रघुवंश -१४.२७
१५. अभिज्ञानशाकुन्तल -३.२४
१६. मेघदूत -१.३७
१७. मैत्रायणीसंहिता -१.८.९
१८. अष्टाध्यायी -७.३.७
१९. अमरकोष — २.९.९०
२०. काशिका न्यास- ७.३.७
२१. पाणिनिकालीनभारत-पृ०सं०-३९३
२२. अर्जुनरावणीय-२३.६
२३. अर्जुनरावणीय -१५.५४
२४. वासुदेवविजय - ६.१०६
२५. रघुवंश- ६.६१
२६. रघुवंश-१०.१४
२७. चम्पूरामायण -११.१३
२८. अनर्घराघव -२.३
२९. द्व्याश्रयमहाकाव्य -२०.३३
३०. माघ -१४.९
३१. अष्टाध्यायी -८.४.३
३२. काशिका न्यास-८.४.३
३३. प्रक्रियासर्वस्व-७९०,२४५५
३४. वाल्मीकिरामायण — अरण्यकाण्ड -१९.१३
३५. काठकसंहिता -४७.१०
३६. रघुवंश -१२.५१
३७. रघुवंश- १५.६३
३८. भट्टिकाव्य- ७.६३

३९. भट्टिकाव्य- ९.९३
४०. माघ- १३.१९
४१. अर्जुनरावणीय -१४.३२
४२. द्व्याश्रयमहाकाव्य -४.३
४३. वासुदेवविजय- ७.७२